ISSN : 2583-2271
Vol. - I, No. 1: 2021

# व्याकरणशास्त्रे पदविचारः

**श्रीमान् सुमन्तचौधुरी**

**प्रबन्धसारः**

*जनाः परस्परं मनोगतभावप्रकटनाय वाक्यमेव उत्तममाध्यमरूपेण व्यवहरन्ति। तच्च वाक्यं भवति पदसमष्टिः। पदमाधारीकृत्य वर्तते दार्शनिकानां विविधा विमतिः। नैयायिकैः वृत्तिमत्त्वं पदत्वं, मीमांसकैः आनुपूर्वीविशिष्टवर्णसमुदायवत्त्वं, प्रयोगार्हानन्वितैकार्थबोधकत्वे सति वर्णसमुदायत्वमित्येवं विविधं पदलक्षणं प्रतिपाद्यते। अस्मिन् प्रबन्धे तु पदविषयिणी वैयाकरणचर्चा क्रियते। तत्र पाणिनिमते, भर्तृहरिमते, शृङ्गारप्रकाशकारमते च पदानां विविधा भेदा आलोचिताः। तत्र पाणिनिः सुबन्तस्य तिङन्तस्य च पदसंज्ञां स्वीकृत्य पुनः त्रिभिः सूत्रैः पारिभाषिकपदत्वमालोचितम्। भर्तृहरिः साध्वसाधुभेदेन शब्दस्य द्वैविध्यं स्वीकृत्य पुनः अन्वाख्येयप्रतिपादकभेदेन शब्दस्य भेदद्वयं कल्पितम्। किञ्च, वैयाकरणग्रन्थेषु आलोचिताः मुख्यं, लाक्षणिकं, व्यञ्जकं चेति अन्येऽपि भेदा अत्र दर्शिताः। तदनु शृङ्गारप्रकाशकारदिशा पदानां क्रियारूपं, कारकरूपम्, उपस्काररूपं चेति भेदत्रयं प्रकल्प्य क्रियारूपस्य कारकरूपस्य च षड्भेदाः, उपस्काररूपस्य च पञ्च भेदा उदाहरणपुरःसरं दर्शिताः। अन्तिमे च पदानां विविधभेदेषु सत्स्वपि अर्थवत्त्वं शक्तिमत्त्वं वा पदस्य लक्षणमिति सिद्धान्तितम्।*

## उपोद्घातः

अखिलेऽस्मिन् प्रपञ्चे मनोगतभाव-प्रकाशनाय जनैः वाक्यव्यवहारशैली आदृता। वाक्यं च भवति पदानाम् अनेकेषां संसर्गात्मकम्। अतः भावबोधनाय यथा वाक्यस्य आवश्यकता अस्ति तथैव पदानामपि। पद्यते गम्यते अर्थः अनेनेति पदम्। लोके अर्थबोधनाय यत्प्रयुज्यते तस्य पदमिति संज्ञा। उच्यते तावत् दण्डिना काव्यादर्शे -

"इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥"

इदं पदमेव भिन्नेषु शास्त्रेषु भिन्नभिन्नार्थेषु व्यवह्रियते। यथा वेदान्ते पदशब्देन ब्रह्मणो बोधः, सर्वे वेदा यत्पदमामनन्ति इत्यादिश्रुतेः। गान्धर्ववेदे रागविशिष्टा गीतिः पदाभिधेया भवति। वास्तुशास्त्रे पदशब्देन निर्दिष्टपरिमाणविशेषस्य बोधो भवति। ज्योतिश्शास्त्रे तु अयमेव पदशब्दः कालविशेषवाचकः। केचन अवान्तर-वाक्यानामपि पदत्वमङ्गीकुर्वन्ति। तथाहि श्रूयते कश्चिच्छ्लोकः-

"श्लोकपादः पदं केचित्
सुप्तिङन्तमथापरे।
परेऽवान्तरवाक्यैकस्वरूपं पदमूचिरे॥"
इति।

एवं पदशब्दस्य दृश्यते नानार्थेषु प्रयोगः। विभिन्नेषु दर्शनेषु अपि पदमादाय महती चर्चा शास्त्रकारैः विहिता। अस्मिन् प्रबन्धे व्याकरणदिशा पदस्वरूपमालोच्यते।

## पाणिनिमतम्

वैयाकरणाः शब्दं ब्रह्मत्वेन स्वीकुर्वन्ति। तस्य शब्दस्य किं स्वरूपमित्यादिविषये महाभाष्ये पस्पशाह्निके निरूपितम् आचार्यपतञ्जलिना। सिद्धान्तभूतस्य स्फोटरूपशब्दस्य अष्टौ भेदाः वर्णस्फोटादि-रूपेण परिकल्पिताः। अष्टविधस्फोटेषु पदस्फोटः अन्यतमः। वर्णस्फोटस्वीकारेण समभिव्याहृतवर्णानां वाचकत्वे सिद्धे तादृशवर्णसमभिव्याहाररूपपदस्य वाचकता

ISSN : 2583-2271
Vol. - I, No. 1: 2021

सिध्यति, प्रतिवर्णमर्थस्मरणस्यानुभव-विरुद्धत्वात्, प्रत्येकं वर्णानामर्थवत्त्वे प्रातिपदिकत्वापत्तौ नलोपः प्रातिपदिकान्तस्य इत्यादिभिश्च धनम्, वनम् इत्यादौ नलोपाद्यापत्तेश्च पदस्फोटः अवश्यं स्वीकर्तव्यः। एवं व्याकरणे पदस्य महदावश्यकता वर्तते। पाणिनीयशास्त्रे पदसंज्ञाविधायकानि चत्वारि सूत्राणि सन्ति। तानि तावत् - "सुप्तिङन्तं पदम्" (अष्टा. १-४-१४), "नः क्ये" (अष्टा. १-४-१५), "सिति च" (अष्टा. १-४-१६), "स्वादिष्वसर्वनामस्थाने" (अष्टा. १-४-१७) चेति।

**सुप्तिङन्तं पदम् (अष्टा. १-४-१४) -** सुप् च तिङ् च इति विग्रहे इतरेतरद्वन्द्वसमासे सुप्तिङौ इति रूपम्। सुप्तिङौ अन्ते यस्य इति विग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण बहुव्रीहिसमासे सुप्तिङन्तम् इति रूपम्। द्वन्द्वादौ द्वन्द्वमध्ये द्वन्द्वान्ते च श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते इति न्यायेन अन्तपदस्य सुपा तिङा च सम्बन्धो भवति। तेन सुबन्तं तिङन्तमिति लभ्यते। सुबन्तं तिङन्तं च पदसंज्ञं स्यादिति सूत्रार्थः।

अत्र सुपा तिङा च प्रत्याहारस्य ग्रहणम्। सुप् इत्यनेन स्वादिसुबन्ताः एकविंशतिः प्रत्यया (सु, औ, जस्, अम्, औट्, शस्, टा, भ्याम्, भिस्, ङे, भ्याम्, भ्यस्, ङसि, भ्याम्, भ्यस्, ङस्, ओस्, आम्, ङि, ओस्, सुप् चेति) गृह्यन्ते। तिङा च तिबादयः अष्टादशप्रत्ययाः (तिप्, तस्, झि, सिप्, थस्, थ, मिप्, वस्, मस्, त, आताम्, झ, थास्, आथाम्, ध्वम्, इड्, वहि, महिङ् चेति) गृह्यन्ते। देवः, देवेन, करिष्यति, अकरिष्यत् चेत्यादीनि इहोदाहरणानि।

तथाहि देवशब्दस्य "कृत्तद्धितसमासाश्च" (अष्टा. १-२-४६) इति सूत्रेण प्रातिपदिकसंज्ञायां ततः प्रथमैकवचनविवक्षायां सौ देवः इति रूपम्। अत्र देवः इत्यस्य सुबन्तत्वात् प्रस्तुतसूत्रेण पदत्वं सिध्यति। एवमेव करिष्यति इत्यादीनामपि तिङन्तत्वात् पदत्वं सिध्यति।

ननु सूत्रे सुबित्यनेन कथं प्रत्याहारग्रहणम्, सप्तमीबहुवचनस्य विद्यमानत्वात् तस्य ग्रहणं कस्मान्न भवतीति? चेदुच्यते, **न ङिसम्बुद्ध्योः** (अष्टा. ८-२-८) इति प्रतिषेधात्। सप्तमीबहुवचनस्य सुपो ग्रहणे ङिसम्बुद्ध्योः पदत्वाभावान्नलोपस्य प्राप्तिरेव नास्तीति प्रतिषेधोऽनर्थकः स्यादिति सुबित्यनेन प्रत्याहारस्यैव ग्रहणं स्वीकर्तव्यम्।

पदसंज्ञायां सत्यां **ससजुषो रुः** (अष्टा. ८-२-६६) इत्यनेन रुत्वं, **खरवसानयोर्विसर्जनीयः** (अष्टा. ८-३-१५) इति सूत्रेण विसर्जनीयत्वं, **तिङ्ङतिङः** (अष्टा. ८-१-२८) इति सूत्रेण निघातस्वरः चेत्यादीनां विधानं भवति। किञ्च अस्य सूत्रस्य महदेकं प्रयोजनं भवति लोके शब्दानां प्रयोगार्हत्वसम्पादनम्। उक्तञ्च भाष्यकारेण **अपदं न प्रयुञ्जीत** इति। अर्थात् अपरिनिष्ठितं न प्रयोक्तव्यमिति।

**नः क्ये (अष्टा. १-४-१५) -**अस्मिन् सूत्रे पदद्वयं नः इति प्रथमैकवचनान्तं पदम्, न इत्यत्र अकार उच्चारणार्थकः। क्ये इति सप्तम्येकवचनान्तं पदम्। पूर्वसूत्रात् सुबिति पदमिति च पदद्वयमनुवर्तते। सुबित्यनेन सुबन्तस्य ग्रहणम्। तच्च नकारेण विशिष्यते। प्रत्ययग्रहणेन तदन्तग्रहणमिति परिभाषया अत्र न इत्यनेन नान्तमिति लभ्यते। तेन सूत्रार्थो भवति क्ये परतः नान्तं सुबन्तं पदसंज्ञं भवति इति।

सूत्रे क्ये इति पदेन क्यच् क्यङ् चेति प्रत्यययोः सामान्यग्रहणं, न तु क्यषः, "लोहितडाज्भ्यः क्यष्वचनम्" (अष्टा. ३-१-१३) इति वक्ष्यमाणतया हलन्तात्क्यषः अभावात्।

क्यचि उदाहरणं तावत् राजीयति इति।

तथाहि आत्मनो राजानमिच्छतीति “सुप आत्मनः क्यच्” (अष्टा. ३-१-८) इति सूत्रेण क्यचि अनुबन्धलोपे राजन् य इति स्थिते क्यचि परे राजन् इत्यस्य प्रस्तुतसूत्रेण पदत्वात् “नलोपः प्रातिपदिकान्तस्य” (अष्टा. ८-२-७) इति सूत्रेण नलोपे, “क्यचि च” (अष्टा. ७-४-३३) इतीत्त्वे राजीय इति जाते तस्य “सनाद्यन्ता धातवः” (अष्टा. ३-१-३२) इत्यनेन धातुसंज्ञायां ततः वर्तमानकालार्थे लटि ततः तिपि विभक्तिकार्ये राजीयति इति रूपम्।

क्यङि उदाहरणं तावत् राजायते इति। तथाहि राजेवाचरतीति “कर्तुः क्यङ् सलोपश्च” (अष्टा. ३-१-११) इति क्यङि, अनुबन्धलोपे राजन् य इति स्थिते क्यङि परे राजन् इत्यस्य प्रस्तुतसूत्रेण पदत्वात् “नलोपः प्रातिपदिकान्तस्य” (अष्टा. ८-२-७) इति सूत्रेण नकारलोपे राज य इति जाते “अकृत्सार्वधातुकयोः” (अष्टा. ७-४-२५) इति सूत्रेण दीर्घे राजाय इति जाते तस्य “सनाद्यन्ता धातवः” (अष्टा. ३-१-३२) इति सूत्रेण धातुसंज्ञायां ततः वर्तमाने लटि तिपि विभक्तिकार्ये राजायते इति रूपम्। अनेन सूत्रेण पदसंज्ञाविधानस्य फलं “नलोपः प्रातिपदिकान्तस्य” (अष्टा. ८-२-७) इति सूत्रेण नलोपविधानम्।

**सिति च (अष्टा. १-४-१६) -** अस्मिन् सूत्रे पदद्वयं सिति इति सप्तम्येकवचनान्तं पदं, चेति अव्ययपदम्। सकारः इत् यस्येति विग्रहे बहुव्रीहिसमासे सित् इति रूपं, तस्मिन् सिति इति। सिति प्रत्यये परतः पूर्वं पदसंज्ञं स्यादिति सूत्रार्थः। अहंयुः, शुभंयुः चेत्यादीनि इहोदाहरणानि। तथाहि अहम् अस्यास्तीति विग्रहे अहम् इति विभक्तिप्रतिरूपकादव्ययाद् “अहंशुभमोर्युस्” (अष्टा. ५-२-१४०) इति सूत्रेण युसि अनुबन्धलोपे अहम् यु इति स्थिते युसः सित्वात् तस्मिन् परे अहम् इत्यस्य प्रस्तुतसूत्रेण पदसंज्ञायां “मोऽनुस्वारः” (अष्टा. ८-३-२३) इत्यस्य मान्तस्य पदस्य अन्त्यस्य मकारस्य अनुस्वारे अहंयुरिति रूपम्। एवं शुभंयुरित्यत्रापि ज्ञेयम्। अनया पदसंज्ञया पुरस्तादपवादन्यायेन भसंज्ञाया बाधो भवति। अनेन सूत्रेण पदसंज्ञायां सत्यां “वा पदान्तस्य” (अष्टा. ८-४-५९) , “मोऽनुस्वारः” (अष्टा. ८-३-२३) चेत्यादीनि सूत्राणि प्रवर्तन्ते। अस्य सूत्रस्य प्रयोजनं भसंज्ञाबाधनं, तत्प्रयुक्तकार्यस्य च अभावविधानम्।

**स्वादिष्वसर्वनामस्थाने (अष्टा. १-४-१७) -** कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु पूर्वं पदं स्यादिति सूत्रार्थः। राजभ्याम्, राजभिः, राजता चेत्यादीनीहोदाहरणानि। तथाहि राजन्प्रातिपदिकात् भ्यामि अनुबन्धलोपे राजन् भ्याम् इति स्थिते भ्यामः कप्प्रत्ययावधित्वात् स्वादित्वात् असर्वनामस्थानत्वात् तस्मिन् परे पूर्वस्य राजन् इत्यस्य प्रस्तुतसूत्रेण पदत्वात् “नलोपः प्रातिपदिकान्तस्य” (अष्टा. ८-२-७) इति सूत्रेण नलोपे राज भ्याम् इति जाते ततः संयोगे राजभ्याम् इति रूपं सिद्धम्। अस्य सूत्रस्य फलं जश्त्वकुत्वादिविधानम्।

## भर्तृहरिमतम्

आचार्यभर्तृहरिणा ब्रह्मकाण्डे साध्वसाधुभेदेन शब्दस्य द्वैविध्यं वर्णितम्। एतावुभावपि अन्वाख्येयप्रतिपादकभेदेन भिन्नौ, प्रयोगे तु साधोर्धर्मः, प्रत्ययश्चेत्युभयमपि फलम्, असाधोस्तु प्रत्यय एव फलम्। तथाहि महाभाष्ये उच्यते - “समानायामर्थावगतौ शास्त्रेण धर्मनियमः क्रियते” इति।

**क) अन्वाख्येयपदम् -** अन्वाख्यातुमिष्टः शक्यो योग्यो वान्वाख्येयः, प्रकृतिप्रत्ययरूपविभागपूर्वकं विविच्याख्यायते यः सः अन्वाख्येय इत्यर्थः। स तु पदं वाक्यं च। रामः,

ISSN : 2583-2271
Vol. - I, No. 1: 2021

दाशरथिः इत्यादौ रम् घञ् सु, दशन् रथ इञ् सु इति विभागानामन्वाख्यानं व्याकरणेन विधीयते। इमे एवान्वाख्येयाः शब्दाः। वाक्यस्याप्यन्वाख्यानं भवत्येव। अयं कर्ता, इयं क्रिया, इदं च कर्म, अयं व्यापाराश्रयः, इदं फलाश्रयम्, इत्यादि अन्वाख्यानं वाक्ये अपि दृश्यते। अतः पदं वाक्यं च अन्वाख्येयम्।

**ख) प्रतिपादकपदम्** - प्रतिपादयन्त्यर्थं ये ते प्रतिपादकाः। ते च वाक्यानि पदानि प्रकृतयः प्रत्ययाश्च। वाक्यं स्वरूपबोधनद्वारा स्वार्थं प्रतिपादयति। पदं स्वार्थं वाक्यार्थं च बोधयति। प्रकृतिः प्रत्ययश्च स्वं स्वमर्थं प्रतिपादयतः। यथा भू इति प्रकृतिः सत्तारूपमर्थं, ति इति वर्तमानकालं, प्रथमपुरुषम्, एकवचनं च प्रतिपादयति। भू ति इति समुदितं भवति इति पदं पदार्थं प्रतिपादयति। एवं वाक्ये अपि। एतत्प्रतिपत्त्युपायभूतं प्रतिपादकत्वं वाक्ये पदे प्रकृतौ प्रत्यये च विद्यत एव। तथापि प्रकृतिप्रत्ययाभ्यां पदं, पदैश्च वाक्यं प्रतिपाद्यं भवतीति, प्रकृतिप्रत्ययौ तु न केनापीति, प्रतिपादकत्वं प्रकृतौ प्रत्यये चैव समुपलभ्यते अतः प्रकृतिप्रत्यययोरेव प्रतिपादकत्व् अभ्युपगम्यते। तथाह्युच्यते वाक्यपदीये -

"अपोद्धारपदार्था ये ये चार्थाः स्थितलक्षणाः।

अन्वाख्येयाश्च ये शब्दा ये चापि प्रतिपादकाः॥

कार्यकारणभावेन योग्यभावेन च स्थिताः। धर्मे च प्रत्यये चाङ्गं सम्बन्धाः साध्वसाधुषु॥"[1] इति।

सामान्यतः वैयाकरणाः पदस्य त्रैविध्यं स्वीकुर्वन्ति - मुख्यं, लाक्षणिकं, व्यञ्जकं चेति।

**१. मुख्यम्** -अभिधावृत्त्या यत्र अर्थस्य निर्धारणं भवति तत् मुख्यं पदम्। तत्पदं त्रिविधं - रूढं, यौगिकं, योगरूढं चेति।

**क) रूढम्** – शास्त्रकल्पितावयवार्थभानाभावे समुदायार्थनिरूपितशक्तिमत् रूढम्। यथा मणिनूपुरादि। तथाहि भ्वादिगणपठितात् शब्दार्थकात् मण्धातोः औणादिके इन्प्रत्यये मणिरिति रूपम्। एवमेव स्तुत्यर्थकात् नुधातोः "सम्पदादिभ्यः क्विप्" इति वार्तिकेन क्विपि सर्वापहारलोपे नूः इति रूपम्। अग्रगमनार्थकात् पुर्धातोः "इगुपधज्ञाप्रीकिरः कः" (अष्टा. ३-१-१३५) इति सूत्रेण कप्रत्यये पुर इति रूपम्। नुवः पुरः इति विग्रहे नूपुरः इति रूपम्। उभौ अपि शब्दौ शब्दकर्तृरूपमर्थं स्तुतिसम्बन्ध्यग्रगमनकर्तृरूपं चार्थं न बोधयतः, परन्तु समुदायशक्त्या रत्नविशेषं, अलङ्कारविशेषञ्च बोधयतः। अतः शास्त्रकल्पितानां प्रकृतिप्रत्ययरूपावयवार्थानां प्रतीत्यभावे समुदायेन रत्नविशेषार्थः, अलङ्कारविशेषार्थो वा गम्यते, तन्निरूपितशक्तिमत्त्वात् मणिशब्दस्य नूपुरशब्दस्य वा रूढत्वं सङ्गच्छते।

**ख) यौगिकम्** – शास्त्रकल्पितावयवार्थनिरूपितशक्तिमद् यौगिकम्। अर्थात् शास्त्रकृत्कल्पितेषु अवयवेषु यः अर्थो वर्तते तन्निरूपितशक्तिमत्पदं भवति यौगिकपदम्। यथा पाचकादिपदम्। तथाहि पाकार्थकात् पच्धातोः कर्तरि अर्थे "ण्वुल्तृचौ" (अष्टा. ३-१-१३३) इति सूत्रेण ण्वुलि अनुबन्धलोपे अकादेशे पाचक इति रूपं सिध्यति। अत्र धातोः प्रत्ययस्य चः यः अर्थः तन्निरूपिता शक्तिर्वर्तते इति हेतोः पाचक इति यौगिकं पदम्।

**ग) योगरूढम्** – शास्त्रकल्पितावयवार्थान्वितविशेष्यभूतार्थनिरूपितशक्तिमत् योगरूढमिति। अर्थात् शास्त्रकृत्कल्पितावयवार्थेषु अन्वितो यो विशेष्यभूतार्थः

[1] वाक्यपदीये ब्रह्मकाण्डम्, २४, २५ श्लोकौ।

तन्निरूपिता समुदायबोधकता या शक्तिः तद्वद्भवति योगरूढं पदम्। यथा पङ्कजादिपदम्। अत्र अवयवार्थानां पङ्काज्जायते इत्यादीनां समुदायार्थस्यस्य पद्मरूपार्थस्य च बोधो भवति। तेनात्र शास्त्रकल्पिता-वयवार्थपङ्कजनिकर्तृत्वरूपार्थान्वितपद्मरूप-विशेष्यभूतार्थनिरूपितशक्तिमत्त्वात्पङ्कज-पदस्य योगरूढत्वम्।

एतत्त्रयं विहाय मीमांसकाः अन्यमपि एकं पदं स्वीकुर्वन्ति। तदस्ति यौगिकरूढम्। शास्त्रकल्पितावयवार्थसमुदायार्थनिरूपितशक्तिमत् यौगिकरूढमिति। अर्थात् येषां पदानां यौगिके अर्थे रूढे चार्थे प्रयोगः पृथक् पृथक् भवति तत् यौगिकरूढम्। यथा अश्वगन्धादिपदम्। अश्वगन्ध इति पदम् ओषधिविशेषे रूढम्, अश्वसम्बन्धिगन्धवत्तया वाजिशालांशबोधे यौगिकम्। एवमेव मण्डपपदं गृहविशेषे रूढं, मण्डपानकर्तरि यौगिकमिति।

**२. लाक्षणिकम्**

लक्षणया जातं लाक्षणिकम्। लक्षणावृत्त्या यत्र अर्थस्य निर्धारणं भवति तल्लाक्षणिकम्। लक्षणा हि स्वशक्यसम्बन्धरूपा। तथाहि अत्र लाक्षणिकत्वेनाभिमतं पदं स्वशब्देन गृह्यते। तेन स्वस्य लाक्षणिकास्यार्थस्य, शक्येन शक्त्योपस्थापितार्थेन सह यः सम्बन्धः सामीप्यादिः स लक्षणा इत्युच्यते। अन्वयानुपपत्तिस्तात्पर्यानुपत्तिर्वा लक्षणाया बीजम्। यथा गङ्गायां घोष इत्यत्र गङ्गापदस्य प्रवाहविशेषे शक्यार्थे घोषस्य अनन्वयात् तात्पर्यानुपपत्तेर्वा लक्षणया तटरूपार्थस्य बोधो भवति। अतः गङ्गापदमत्र लाक्षणिकम्। नागेशभट्टस्तु अप्रसिद्धशक्तिं स्वीकृत्य लक्षणां तत्र अन्तर्भावयति।

**३. व्यञ्जकम्**

व्यञ्जनावृत्तिमत् पदं भवति व्यञ्जकम्। नागेशमते व्यञ्जना हि मुख्यार्थबाधनिरपेक्षबोधजनको मुख्यार्थसम्बद्धासम्बद्धसाधारणः प्रसिद्धाप्रसिद्धार्थ-विषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धः संस्कारविशेष इति। शब्दतदर्थपदपदैकदेशवर्णरचना-चेष्टादिषु सर्वत्र व्यञ्जनायाः सत्त्वात् तद्विशिष्टस्य पदस्य व्यञ्जकमिति। व्यञ्जनास्वीकारे एव निपातानां द्योतकत्वं स्फोटस्य च व्यङ्ग्यता हरिणा प्रतिपादिता। द्योतकत्वं च स्वसमभिव्याहृतपदनिष्ठशक्तिव्यञ्जकत्वमिति।

**शृङ्गारप्रकाशकारमतम्**

शृङ्गारप्रकाशे पद्यते अनेन अर्थ इति विग्रहे पदशब्दं निष्पाद्य तस्य क्रियारूपं, कारकरूपम्, उपस्काररूपं चेति भेदत्रयं प्रकल्पितम्। तेषां विवरणमधस्तात् प्रदीयते।

**क) क्रियारूपं पदम्-** साध्यार्थाभिधायि क्रियारूपम्। तस्यार्थस्तावत् साध्यस्य धातोः व्यापाररूपार्थस्य वाचकं यत् तत् क्रियारूपं पदमिति। षड्विधम् - भावपदम्, कर्मपदं, कर्तृपदं, भावकर्मपदं, भावकर्तृपदं, कर्मकर्तृपदं चेति।

**१) भावरूपम्** - यया क्रियया (तिङा) भावस्य अभिधानं भवति तद्भावरूपं पदम्। यथा पच्यते, अपाचि, पक्ष्यते देवदत्तेन, आस्यते आसि, आसिष्यते भवता चेत्यादीनि उदाहरणानि।

**२) कर्मपदम्** - यया क्रियया (तिङा) कर्म उक्तं भवति तत्कर्मपदम्। यथा पच्यते ओदनः सूदेन, गम्यते ग्रामः पान्थेन, आस्यते मासो भृतकेन चेत्यादीनि उदाहरणानि।

**३) कर्तृपदम्** - यया क्रियया (तिङा) कर्ता उक्तो भवति तत्कर्तृपदम्। यथा पचति चैत्रः,

तपति सुवर्णं सुवर्णकारः, सृजते धर्मं धार्मिकः चेत्यादीनि उदाहरणानि।

**४) भावकर्मपदम्** - यस्यां क्रियायां भावः कर्मत्वेन अन्वेति तद्भावकर्मपदमित्युच्यते। यथा इच्छामि भुञ्जीत भवान्, इच्छामि भुङ्क्तां भवान्, पश्य मृगो धावति, स्मरसि देवदत्त काश्मीरेषु वत्स्यामः चेत्यादीनि उदाहरणानि।

**५) भावकर्तृपदम्** - यस्यां क्रियायां भावस्य कर्तृरूपेण अन्वयो भवति तद्भावकर्तृपदमित्युच्यते। यथा चोरस्य रुजति, चोरस्य बाधते, अस्ति गच्छामो वयम्, अस्त्यत्र काञ्चिद् गां पश्यति। एवमेव पाको वर्तते, अन्वेषणा वर्तते।

**६) कर्मकर्तृपदम्** - यस्यां क्रियायां कर्म कर्तृत्वेन अन्वेति तत् कर्मकर्तृपदमित्युच्यते। यथा रज्यति वस्त्रं स्वयमेव, कुष्यति पादस्स्वयमेव, अवकिरते हस्ती चेत्यादीनि उदाहरणानि।

कृदन्तं क्रियारूपमपि पूर्वोक्तप्रकारेण षड्विधं भवति। इह तैर्यातम्, प्रकृतः कटो भवता, कृतवान् कटम्, क्रियाः क्रियन्ते, पाको वर्तते, भिदेलिमानि काष्ठानि चेत्यादीनि यथाक्रममुदाहरणानि।

**ख) कारकरूपं पदम् -** कारकरूपपदस्य लक्षणं तावत् साधनार्थाभिधायित्वं कारकपदत्वमिति। साधनं नाम क्रियानिष्पादकम्। तदर्थस्य वाचकं यत् तत् कारकपदमिति। एतदपि षड्विधम् - कर्तृपदं, कर्मपदं, करणपदं, सम्प्रदानपदम्, अपादानपदम्, अधिकरणपदं चेति। तेषामपि अवान्तरभेदास्तत्र प्रदर्शिताः।

**ग) उपस्कारपदम्** - उपस्कारो नाम अध्याहारः। साध्यसाधनयोर्भूषणादि-भूतमुपस्कारम् इति उपस्कारपदलक्षणं शृङ्गारप्रकाशे। अर्थात् साध्यस्य वा भवतु साधनस्य वा तयोः भूषणाद्यर्थस्फुरणाय यत्पदमध्याह्रियते तत् उपस्कारमतम् इति।

तादृशं पदं पञ्चविधम् - विशेषणरूपं, निपातादिरूपम्, आख्यातादिरूपं, सम्बोधनादिरूपं, हेत्वादिरूपं चेति।

**१. विशेषणरूपम्** - विशिष्यते अनेनेति विशेषणम् इतरस्माद्व्यावर्तकमित्यर्थः। इदं विशेषणपदं त्रिविधं -क्रियाविशेषणं कारकविशेषणम्, उपसर्गश्च। साधु पचति, भीष्ममुदारं दर्शनीयं कटं करोति, एहि मन्ये रथेन यास्यति चेत्यादीनि यथाक्रमम् अत्रोदाहरणानि।

**२. निपातादिरूपम्** - कर्मप्रवचनीयाः अव्ययानि च। यथा अहं च त्वं च वृत्रहन्, असाम्प्रतं जेतुम् चेत्यादीनीहोदाहरणानि।

**३. आख्यातादिरूपम् -** कृतस्तद्धिताश्च। यथा - रैपोषं पुष्यति, ब्राह्मणवद् ब्रवीति चेत्यादीनि उदाहरणानि ।

**४. सम्बोधनादिरूपम्** - सम्बोधनादयः आमन्त्रणमवधिभावो लिङ्गञ्च, यथा- हे देवदत्त, भुक्ता व्रजतीति, स इति। सम्बन्धादयश्शेष इति। उपपदम्, सहार्थश्च, यथा- राज्ञः पुरुषः, कुशलं देवदत्तायेति, पुत्रेण सहायात चेत्याद्युदाहरणानि।

**५. हेत्वादिरूपम्** - हेतुर्लक्षणं तादर्थ्यं च। यथा विद्यया यशः, कमण्डलुना छात्रः, यूपाय दारु चेत्यादीनीहोदाहरणानि।

तत्र साध्यार्थाभिधायि भवति क्रियापदं, साधनार्थाभिधायकं कारकपदं, साध्यसाधनयोः भूषणादिभूतं भवति उपस्कारपदम्।

## उपसंहारः

सर्वेषु एव दर्शनेषु पदमाश्रित्य दृश्यते विचारः। दर्शनभेदात् दृश्यन्ते पदानां बहवो भेदाः। एवं पदस्य बहुषु भेदेषु सत्स्वपि अर्थवत्त्वमेव तेषामाधारभूतम्। सर्वेषु एव दर्शनेषु यद्यपि पदस्य लक्षणं भिन्नं भिन्नं दृश्यते, भेदाश्च प्राप्यन्ते पृथक् पृथक् तथापि सर्वत्र अर्थवत्त्वमेव पदत्वमिति निष्कर्ष

आगच्छति। यथा शृङ्गारप्रकाशे पदस्य बहवो भेदा उल्लिखिताः, परन्तु तत्र पदस्य लक्षणं पद्यते गम्यते अर्थः अनेन इति प्रातिपादितम्। एतेनापि अर्थवत्त्वमेव पदत्वमिति आयाति। एवं मीमांसकानां वा भवतु, नैयायिकानां साहित्यिकानां वा सर्वत्र अर्थवत्त्वमेव पदत्वमिति सिद्धान्तः। वैयाकरणैरपि यद्यपि अर्थवत्त्वं पदत्वमिति स्वीकृतं, "सुप्तिङन्तं पदम्" इति सूत्रात् तथापि तेषां पारिभाषिकमपि पदमस्ति। तदर्थं सूत्रत्रयमपि प्रणीतम्। अर्थवत्त्वं पदत्वमिति स्वीक्रियते चेत् वाक्यादिषु अतिव्याप्तिर्भवतीति कृत्वा दार्शनिकैः पदलक्षणे अर्थवत्त्वम् आधारत्वेन स्वीकृत्य भिन्नं भिन्नं लक्षणं प्रतिपादितम्। एवं शक्तिमत्त्वं पदत्वमिति पदस्य लक्षणं स्वीकृत्य प्रातिपदिकानां प्रत्ययानाम् उपसर्गाणां निपातानां च पृथक्पदत्वं स्वीकुर्वन्ति तत्रापि धातुना सहितस्य एव उपसर्गस्य प्रयोगः भवति, प्रत्ययानामपि प्रकृतिभिः सह प्रयोगः, लोके तस्मादेव अर्थबोधात्।

एवं शास्त्रेषु स्वस्वसिद्धान्तप्रतिपादनाय अर्थवत्त्वं वा शक्तिमत्त्वं वा पदत्वं स्वीक्रियते। परन्तु तेन उपसर्गादीनां ग्रहणसम्भवे अपि धातुभिः सहैव तेषां प्रयोगः इत्यलमतिविस्तरेण।

### सहायकग्रन्थाः


- नागेशभट्टः। (२०११)। *परमलघुमञ्जूषा किरणावलीव्याख्योपेता*। दाहालः, लोकमणिः (सम्पा.)। वाराणसी : चौखम्बा सुरभारती प्रकाशन।
- भर्तृहरिः। (२००७)। *वाक्यपदीयम् (ब्रह्मकाण्डम्)*। खण्डूडी, सत्यनारायणः (सम्पा.)। वाराणसी : चौखम्बा संस्कृत संस्थान।
- भट्टोजिदीक्षितः। (पुनर्मुद्रणम् २०१०)। *वैयाकरणसिद्धान्तकौमुदी (प्रथमो भागः)*। शर्मा, गिरिधरः; शर्मा, परमेश्वरानन्दः (सम्पा.)। दिल्ली : मोतीलाल बनारसीदास।
- भट्टोजिदीक्षितः। (पुनर्मुद्रणम् २०१०)। *वैयाकरणसिद्धान्तकौमुदी (द्वितीयो भागः)*। शर्मा, गिरिधरः; शर्मा, परमेश्वरानन्दः (सम्पा.)। दिल्ली : मोतीलाल बनारसीदास।
- भट्टोजिदीक्षितः। (पुनर्मुद्रणम् २०१०)। *वैयाकरणसिद्धान्तकौमुदी (तृतीयो भागः)*। शर्मा, गिरिधरः; शर्मा, परमेश्वरानन्दः (सम्पा.)। दिल्ली : मोतीलाल बनारसीदास।
- भोजराजः। (२००७)। शृङ्गारप्रकाशः (प्रथमो भागः)। द्विवेदी, रेवाप्रसादः; द्विवेदी, सदाशिवकुमारः (सम्पा.)। देहली : इन्दिरागान्धिराष्ट्रियकलाकेन्द्रम् कालिदाससंस्थानञ्च।